# विवेकानन्दप्रेषितं पत्रम्

## स्वामी विवेकानन्दः

[स्वामिनं शुद्धानन्दमहाराजं प्रति लिखितम् इदं पत्रम्]
ॐ तत् सत्

आलमोडा
१ जुन, १८९७

कल्याणवरेषु,

अवगमं कुशलं तत्रात्यानां वार्ताञ्च सविशेषां मठस्य तव पत्रिकायाम्। ममापि विशेषोऽस्ति शरीरस्य; सविशेषः ज्ञातव्यः भिषक्प्रवरस्य शशिभूषणस्य सकाशात्। ब्रह्मानन्देन संस्कृतया एव रीत्या चलत्वधुना शिक्षा; यदि पश्चात् परिवर्तनमर्हे तदपि कारयेत्। सर्वेषां सम्मतिं गृहीत्वा तु करणीयमिति न विस्मर्तव्यम्।

अहमधुना आलमोडानगरस्य किञ्चिदुत्तरं कस्यचिद् वणिज उपवनोपदेशे निवसामि। सम्मुखे हिमशिखराणि हिमालयस्य प्रतिफलितदिवाकरकरैः पिण्डीकृतरजतानीव भान्ति प्रीणयन्ति च। अव्याहतवायुसेवनेन मितेन भोजनेन समधिकव्यायामसेवया च सुदृढं सुदृश्यं च सञ्जातं मे शरीरम्। योगानन्दः खलु समधिकमस्वस्थ इति श्रृणोमि आमन्त्रयामि तमागन्तुमत्रैव। विभेत्यसौ पुनः पार्वत्यात् जलात् वायोश्च। 'उषित्वा कतिपयानि दिवसानि अत्रोपवने यदि न तावद् विशेषः व्याधेः गच्छ त्वं कलिकातायाम्' इत्यहमद्य तमलिखम्। यथाभिरुचि करिष्यति। अच्युतानन्दः प्रतिदिनं सायाह्ने आलमोडानगर्यां गीतादिशास्त्रपाठं जनानाहूय करोति। बहूनां नगरवासिनां स्कन्धावारस्थानां सैन्यानाञ्च समागमोऽस्ति तत्र प्रत्यहम्। सर्वानसौ प्रीणाति चेति श्रृणोमि।

'यावानर्थः' इत्यादिश्लोकस्य यो बङ्गार्थः त्वया लिखितः नासौ मन्मते समीचीनः। 'सति जले प्लाविते उदपाने नास्ति अर्थः प्रयोजनम्' इति अस्यार्थः—विषमोऽयम् उपन्यासः, किं संप्लुतोदके सति जीवानां तृष्णा विलुप्ता भवति? यद्येवं भवेत् प्राकृतिको नियमः जलप्लावितायां भूमौ जलपानं निरर्थकं—क्वचिदपि वायुमार्गेण अथवा अन्येन केनापि गूढेनोपायेन जीवानां तृष्णानिवारणं स्यात्, तदाऽसौ अपूर्वं अर्थः सार्थकः भवितुमर्हेत्। नान्यथा। शाङ्कर एवावलम्बनीयः।

इयमपि [व्याख्या] भवितुमर्हति—सर्वतः संप्लुतोदकायामपि भूमौ यावानुदपाने अर्थः तृष्णातुराणाम् (अल्पजलमलं भवेदित्यर्थः) 'आस्तां तावद् जलराशिः, मम प्रयोजनं स्वल्पेऽपि जले सिध्यति' एवं विजानतः ब्राह्मणस्य सर्वेषु वेदेषु अर्थः प्रयोजनम्। यथा संप्लुतोदके पानमात्रं प्रयोजनम् तथा सर्वेषु वेदेषु ज्ञानमात्रं प्रयोजनम्।

इयमपि व्याख्या अधिकतरा सन्निधिमापन्ना ग्रन्थकाराभिप्रेता च। उपप्लावितायामपि भूमौ पानाय उपादेयं पानाय हितं जलमेव अन्विष्यन्ति लोकाः नानात्। नानाविधानि जलानि सन्ति भिन्नगुण-धर्माणि उपप्लाविताया अपि भूमेस्तारतम्यात्। एवं विजानन् ब्राह्मणोऽपि विविधज्ञानोपप्लाविते वेदाख्ये शब्दसमुद्रे संसारतृष्णानिवारणार्थं तदेव गृह्णीयात् यदलं भवति निःश्रेयसाय। ब्रह्मज्ञानं हि तत्।

इति शं साशीर्वादं विवेकानन्दस्य